श्री सरस्वती स्तोत्रं

श्री सरस्वती स्तोत्रं (रुद्रयामले बृहस्पति कृतं)

बृहस्पतिरुवाच |
सरस्वति नमस्यामि चेतनां हृदि संस्थितां |
कंठस्थां पद्मयोनिं त्वां ह्रींकारां सुप्रियां सदा || 1 ||

मतिदां वरदां चैव सर्वकामफलप्रदां |
केशवस्य प्रियां देवीं वीणाहस्तां वरप्रदां || 2 ||

मंत्रप्रियां सदा हृद्यां कुमतिध्वंसकारिणीं |
स्वप्रकाशां निरालंबामज्ञानतिमिरापहां || 3 ||

मोक्षप्रियां शुभां नित्यां सुभगां शोभनप्रियां |
पद्मोपविष्टां कुंडलिनीं शुक्लवस्त्रां मनोहरां || 4 ||

आदित्यमंडले लीनां प्रणमामि जनप्रियां |
ज्ञानाकारां जगद्द्वीपां भक्तविघ्नविनाशिनीं || 5 ||

इति सत्यं स्तुता देवी वागीशेन महात्मना |
आत्मानं दर्शयामास शरदिंदुसमप्रभां || 6 ||

श्रीसरस्वत्युवाच |
वरं वृणीष्व भद्रं त्वं यत्ते मनसि वर्तते |
बृहस्पतिरुवाच |
प्रसन्ना यदि मे देवि परं ज्ञानं प्रयच्छ मे || 7 ||

श्रीसरस्वत्युवाच |
दत्तं ते निर्मलं ज्ञानं कुमतिध्वंसकारकं |
स्तोत्रेणानेन मां भक्त्या ये स्तुवंति सदा नराः || 8 ||

लभंते परमं ज्ञानं मम तुल्यपराक्रमाः |
कवित्वं मत्प्रसादेन प्राप्नुवंति मनोगतं || 9 ||

त्रिसंध्यं प्रयतो भूत्वा यस्त्विमं पठते नरः |
तस्य कंठे सदा वासं करिष्यामि न संशयः || 10 ||

इति श्रीरुद्रयामले श्रीबृहस्पतिकृत श्री सरस्वती स्तोत्रं ||